# Takshakadinagakrita Patalalinga Stuti

# તક્ષકાદિનાગકૃતા પાતાલલિઙ્ગસ્તુતિઃ

## Document Information

Text title : Takshakadinagakrita Patalalinga Stuti

File name : takShakAdinAgakRRitApAtAlalingastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 29 sarvanAgakRitapAtAlaliNgapUjA | 5-51||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# તક્ષકાદિનાગકૃતા પાતાલલિઙ્ગસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

તક્ષકઃ (ઉવાચ)

શમ્ભો વિરિઞ્ચિવરમૌલિકપાલપાણે
ચઞ્ચત્સુધાંશુમકુટોજ્જ્વલિતોત્તમાઙ્ગ ।
માં મોચયાશુ દુરિતાત્પરિવઞ્ચકેશ
દેવસ્ત્વમેવ ભગવાંશ્ચ કુલુઞ્ચનાથઃ ॥ ૫॥

મૃડં દૃઢતરં હૃદા સદયમિન્દુચૂડં હૃદા
ભજામિ ભસિતોજ્જ્વલં હૃદયપદ્મસદ્માન્તરે ।
ભુજઙ્ગવરકઙ્કણક્વણનનિઃસ્વનાઙ્ઘ્રિપ્રભા-
વિભાસિનટનાનતં જગદુદારસત્તાણ્ડવમ્ ॥ ૬॥

અનન્તઃ (ઉવાચ)

ભસ્માઙ્ગરાગ ધૃતબાલકુરઙ્ગ સઙ્ગ
ભાલસ્ફુલિઙ્ગ હર (કૃત) નેત્રપતઙ્ગલિઙ્ગ ।
ગઙ્ગાન્તરઙ્ગ મહદિન્દુકૃતોત્તમાઙ્ગ
માતઙ્ગકૃત્તિભુજગાઙ્ગદ હાર પાહિ ॥ ૧૦॥

પાપાનઙ્ગમતઙ્ગભઙ્ગસુમહાલિઙ્ગસ્થ શમ્ભો સદા
શાઙ્ગાઙ્ગસ્થમહોક્ષસઙ્ગભરિતાનન્દાઙ્ગ ગઙ્ગાધર
માં પાહ્યદ્ય હરાન્ધકસ્મરહારમેયપ્રભાવેશ્વર
વિશ્વાધીશ્વર ચન્દ્રશેખર વિભો કારુણ્યદૃક્સઙ્ગતઃ ॥

કમ્બલાશ્વતરાવૂચતુઃ

ભગવન્મદશમનાદ્યવૈદ્ય વેદ-
પ્રતિપાદ્યેશ્વર વિદ્યયાભિવેદ્ય ।
ત્વં પર્ણશદ્ય સુમહન્ ચ મહેશનાદ્ય
આલાદ્ય સર્વતનુગોઽપિ અભેદ્ય શમ્ભો ॥ ૧૪॥

તં કમ્બલાશ્વતરગીતસુસામસીમ-
શ્રીવામદેવ વરસામ રથન્તરેઽયમ્ ।
શ્રીવ્યોમકેશમુમયા પરિપૂજ્યબિલ્વૈ-
સ્તૌ તુષ્ટુવા ભુજગૌ મહેશ્વરમ્ ॥ ૧૫॥

એલાપત્રઃ (ઉવાચ) ।
વન્દે કુરઙ્ગકરસઙ્ગ ભવોરુભઙ્ગં
ભસ્મભિભૂષિતમનઙ્ગમતઙ્ગભઙ્ગમ્ ।
ગઙ્ગાતરઙ્ગવિલસજ્જટિલોત્તમાઙ્ગં
શ્રીલિઙ્ગમેતદગજાહૃદયાન્તરઙ્ગમ્ ॥ ૧૮॥

એલાપત્રસ્ત્રિણેત્રં સ્વકફણિવિલસદ્ધન્યગાત્રોરુવેષ્ટૈ-
સ્તલ્લિઙ્ગાકણ્ઠલગ્નો વિધૃતનવફણારત્નસઞ્છાદિતશ્રીઃ ।
બિલ્વૈશ્ચન્દનલેપસુન્દરમહાકાયૈશ્ચ શીતૈઃ શિવં
સન્તોષ્યાનુદિનં વસત્યુરગપઃ પુણ્યે પ્રદોષેઽપિ ચ ॥ ૧૯॥

કાર્કોટકઃ ઉવાચ ।
શ્રીનીલકણ્ઠ સિતભસ્મવરાવકુણ્ઠ
વૈકુણ્ઠનાથનયનાર્ચિત પાદપદ્મ ।
ઉત્કણ્ઠભાવુકહૃદા પરિચિન્તનીય
પાદામ્બુજે પરિલુઠામિ ચ સન્નકણ્ઠઃ ॥ ૨૨॥

ધૃતરાષ્ટ્રઃ (ઉવાચ)
હર હર ગરકણ્ઠ પાર્વતીશ
ત્રિદશામેયગુણાકર પ્રસીદ ।
હર હર શિતિકણ્ઠ સામિસોમો -
જ્જ્વલિતોત્તંસ યમીન્દ્રચિત્તહંસ ॥ ૨૫॥

ગુલિકઃ (ઉવાચ)
સશઙ્ખચૂડઃ(ડં) શશિચૂડમીશ-
મીડ્યં સદા વેદવચોભિરેવ ।
ભસ્માઙ્ગરાગચ્છવિસન્નિકર્ષા-
દ્વિકર્ષયત્યેવ ચ તતોઽન્ધકારમ્ ॥ ૨૭॥

(દ્વિકર્ષયન્તં ચ મનોઽન્ધકારમ્) ॥૨૭॥

દેવ દેવ પરમેશ્વર શમ્ભો

વિશ્વનાથ મમ નાથ સનાથમ્ ।
માં કુરુષ્વ દયયાદ્ય કૃપાલો
મન્મથાન્તક વિભો શશિચૂડ ॥ ૨૮॥

શઙ્ખચૂડઃ (ઉવાચ)
શમ્ભો કન્દર્પસર્પજ્વરહર પુરહન્ પાહિમામીશ દુઃખાત્
દુર્વારાખર્વ(નલ્પ)ગર્વં જનિમૃતિવિવશં રોગપાપાદિયુક્તમ્ ।
કલ્પાનલ્પજલોદ્ભવોદ્ભવમહાસૃષ્ટૌ લુઠન્તં સદા
ત્વન્મૌલિસ્રગલઙ્કૃતાઙ્ગકમહાલિઙ્ગોત્તમાઙ્ગ પ્રભો ॥ ૩૧॥

(ત્વં માં મૌલિસ્રગાત્મના કુરુ મહાલિઙ્ગોત્તમાઙ્ગે પ્રભો) ॥ ૩૧॥

પિચણ્ડિલઃ (ઉવાચ)
મસ્તાજસ્રગલઙ્કૃતાઙ્ગક મહાસર્પાઙ્ગભૂષોજ્જ્વલ
નેત્રોન્મેષનિમેષણેષિતજગદ્ધાત્રીશચૂડોજ્જ્વલ ।
પાહીશ ત્રિદશોત્તમોત્તમા સદા સામૌક સીમાસ્તુત
કામાઙ્ગપ્રહરાવકામદ સદા માં વામદેવ પ્રભો ॥ ૩૩॥

વારણો હ્યુરગેન્દ્રોઽસૌ વારણત્વગ્વવસા(વરા)ર્ચકઃ(ચિતઃ) ।
નિવારણકરં દેવં પાપનાશકરં પરમ્ ॥ ૩૪॥

વારણઃ (ઉવાચ)
પાહીન્દુદ્યુતિજૂટકૂટ(નાક) તટિનીગર્તાદિનિર્વાપણ
ત્વં કલ્યાણનગાત્તસત્કરધનો જેતા જગત્કારણમ્ ।
(ત્વં કલ્યાણનગાત્તહસ્તકમલો જેતા જગત્કારણમ્) ।
ભસ્માહીન(ન્દુ)સુભૂષણોત્તમ સદા કામાઙ્ગસંહારણ
સર્વપ્રાણહરાન્તકપ્રહરણામેયાઙ્ઘ્રિપદ્મારુણ ॥ ૩૬॥

દ્રતિકઃ (ઉવાચ)
રામાસંહનનાર્ધકાયવિલસત્સોમોજ્જ્વલન્મૂર્ધક
ધૂતોદ્દામશિરઃ કપર્દ સુમહાધૂમાક્ષુનેત્રોજ્જ્વલ ।
ભૂમાનન્દઘન પ્રસીદ ભગવન્ ત્વં વ્યોમકેશઃ શ્રુતેઃ (શ્રુતિ)
સીમા(વ્રાતૈઃ) સંસ્તુતપાદપદ્મ મમ હૃત્કામપ્રદાવ પ્રભો ॥ ૩૯॥

સર્પઃ (ઉવાચ)
શિષ્ટાર્ચિતં સકલકષ્ટહરં પ્રકૃષ્ટ-
મોક્ષપ્રદં કિલસદા શિપિવિષ્ટલિઙ્ગમ્ ।

અષ્ટાકૃતિં ચ ભજતાં ન હિ દુષ્ટભાવો
નષ્ટાશુભા ભુવિ ભવન્તિ સદૈવ સર્પાઃ ॥ ૪૧॥

વામનઃ (ઉવાચ)
ઉચ્ચૈર્ઘોષાદિશેષક્ષિતિધરવરધૃક્ પોષિતાશેષલોક
સૃષ્ટિસ્થિત્યન્તકાર્યેષ્વતિતરમનિશં જાગરૂક પ્રભો મામ્ ।
વેદાત્તર્હોત્તમાદિશેષઘોષિતપદામ્ભોજપ્રભાભાવતો
વેષાકારમિદં સદા ત્રિભુવનં મન્યે કિમન્યેન મે ॥ ૪૩॥

ખર્વટઃ (ઉવાચ)
ત્વદ્ભીષાભીષિતાસ્તે સુરવરનિકરાશ્ચન્દ્રસૂર્યાનિલેન્દ્રા-
સ્ત્વદ્ભાસા ભાસતેદં જગદિદમખિલં લોકજાલૈર્મહેશ ।
(સ્ત્વદ્ભાસા ભાતિ સર્વં જગદિદમખિલૈઃ લોકજાલૈર્મહેશ) ।
વિષ્ણુબ્રહ્મમરુદ્ગણાદિજનકઃ સોમોઽસિ સર્વાન્તરઃ
કસ્ત્વાં સ્તૌતિ મહેશ સર્વતનુભાક્ ત્વં નિર્ગુણોઽસ્યવ્યયઃ ॥ ૪૬॥

વાસુકિઃ (ઉવાચ)
ક્ષયદ્વીર કાકોદરાપારહાર
સ્ફુરત્સ્ફારકર્પૂરગૌરાવહીર-
પ્રભાજાલ નિર્મૂલિતાલોલપાશા-
ત્તકાલ ત્રિકાલાકુલાકારમારવ્યથાસારસંહાર ।
ઉદ્ધતદુ(ભસ્મીકૃત)ત્રૈપુરાકાર ગઙ્ગાધરામેય-
માતઙ્ગ ચર્મામ્બર નીલોત્પલાકારકણ્ઠ સ્ફુર-
ત્સાન્દ્ર ગૌરીકુચાશ્લેષગાઢપ્રભાવાઙ્ગ સઞ્જાત
સદ્ગુણ્ટકાઙ્ગ પ્રભો પાહિ મામ્ ॥ ૪૮॥

સર્પાઃ (ઊચુઃ)
અસ્માકં કુલદૈવતં શશિકલાજૂટાનુકૂટોદ્યત-
સ્ફારાકારભૂજઙ્ગહારવલયાલઙ્કાર લિઙ્ગોત્તમમ્ ।
ઘોટીભૂતમહાગમાન્તશિખરં જૂટીકૃતાહીશ્વરં
પાટીરદ્રવસાર ચન્દનલસત્કોટીરમીક્ષેમહિ ॥ ૫૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે તક્ષકાદિનાગકૃતા પાતાલલિઙ્ગસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૨૯ સર્વનાગકૃતપાતાલલિઙ્ગપૂજા । ૫-૫૧॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 29 sarvanAgakRRitapAtAlali.N
. 5-51..

Notes:

Nāga-s નાગાઃ; that include Takṣaka તક્ષક, Ananta અનન્ત, Elāpati એલાપતિ, Kambalāśvatara કમ્બલાશ્વતર, Kārkoṭaka કાર્કોટક, Dhṛtarāṣtra ધૃતરાષ્ટ્ર, Śaṅkhacūḍa શઙ્ખચૂડ, Picaṇḍila પિચણ્ડિલ, Vāraṇa વારણ, Dratika દ્રતિક, Sarpa સર્પ, Vāmana વામન, Kharvaṭa ખર્વટ, Vāsuki વાસુકિ, eulogize Śiva શિવ via Śivaliṅga-s શિવલિઙ્ગાઃ that they had established in the Pātāla loka પાતાલ લોક with respective names - viz. Takṣakeśam તક્ષકેશમ્, Ananteśam અનન્તેશમ્, Kārkoṭakeśvaram કાર્કોટકેશ્વરમ્, Elāpatīśvaram એલાપતીશ્વરમ્, Kārkoṭakeśvaram કાર્કોટકેશ્વરમ્, Dhṛtarāṣṭreśvaram ધૃતરાષ્ટ્રેશ્વરમ્, Gulikeśvaram ગુલિકેશ્વરમ્, Śaṅkhacūḍeśvaram શઙ્ખચૂડેશ્વરમ્, Picaṇḍīśam પિચણ્ડીશમ્ / Picaṇḍileśvaram પિચણ્ડિલેશ્વરમ્, Vāraṇeśam વારણેશમ્, Drutīśvaram દ્રુતીશ્વરમ્, Sarpeśam સર્પેશમ્, Vāmaneśam વામનેશમ્, Kharvāṭeśam ખર્વાટેશમ્, Vāsukīśānam વાસુકીશાનમ્.

Sarpāḥ સર્પાઃ proclaim Śiva શિવ as their Kuladevatā કુલદેવતા.

Proofread by Ruma Dewan

*Takshakadinagakrita Patalalinga Stuti*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*